**शतकोटि** पु० शतं कोटयोऽग्राणि यस्य । १वज्रे अमरः । शतगुणिता कोटिः शाक० । २शतगुणितकोटिसंख्यायां स्त्री ।

**शतक्रतु** पु० शतं क्रतवोऽस्य । इन्द्रे अमरः ।

**शतग्रन्थि** स्त्री शतं ग्रन्थयोऽस्य । दूर्वायाम् राजनि० ।

**शतघ्नी** स्त्री शतं हन्ति हन–टक् । १अस्त्रभेदे "अयःकण्टकसंछन्ना शतघ्नी महती शिला" विजयरक्षितः । २वृश्चिकाल्यां ३करञ्जे च मेदि० ।

**शततम** त्रि० शतस्य पूरणः तमप् । शतसंख्यापूरणे ।

**शततारा** स्त्री शतगुणिता ताराः शाक० । शतभिषानक्षत्रे ।

**शतदन्तिका** स्त्री शतं दन्ता इव सन्त्यस्य ठन् । नागदन्त्याम् राजनि० ।

**शतद्रु** पु० शतधा द्रवति–द्रु–कु नि० । नदीभेदे तन्नामनिरुक्तिर्यथा "शोके बुद्धिं तदा चक्रे नचैकत्र व्यतिष्ठत । सोऽगच्छत् पर्वतांश्चैव सरितश्च सरांसि च । दृष्ट्वा स(वशिष्ठः) पुनरेवर्षिर्नदीं हैमवतीं तदा । चण्डग्राहवतीं भीमां तस्याः स्रोतस्यपातयत् । सा तमग्निसमं विप्रमनुचिन्त्य सरिद्वरा । शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता । ततः स्थलगतं दृष्ट्वा तत्राप्यात्मानमात्मना । मर्त्तुं न शक्यामीत्युक्त्वा पुनरेवाश्रमं ययौ" भा० आ० १७७ अ० ।

**शतधा** स्त्री शतं ग्रन्थीन् धत्ते धा–क । १दूर्वायाम् । शत+प्रकारे धाच् । २शतप्रकारे अव्य० ।

**शतधामन्** पु० शतं धामानि यस्य । विष्णौ जटा० ।

**शतधार** पु० शतं धारा अग्राणि यस्य । १वज्रे त्रिका० । २शतधारायुक्ते त्रि० "वसोः पवित्रमसि शतधारम्" यजुर्वेदः १।३।४६ । [१स्वर्गे च विश्वः ।

**शतधृति** पु० शतं धृतयोऽस्य । १इन्द्रे २ब्रह्मणि मेदि० ।

**शतपत्र** न०शतं बहूनि पत्त्राणि सुमस्य दलान्यस्य । १पद्मे अमरः । २मयूरे ३सारसखगे ४दार्वाघाटखगे मेदि० ५राजकीरे हेमच० ।

**शतपत्री** स्त्री शतं पत्त्राणि दलान्यस्याः ङीप् । (सेञ्चोति) पुष्पवृक्षभेदे । स्वार्थे क । तत्रैव । [पाठात्मकग्रन्थभेदे ।

**शतपथ** पु० शतं पन्थानो यत्र अच्समा० । यजुर्वेदीयब्राह्मण-

**शतपथिक** त्रि० शतपथं वेत्त्यधीते वा ठन् । शतपथब्राह्मणात्मकग्रन्थाध्यायिनि ।

**शतपद** न० शतं पदानि यत्र । ज्योतिषोक्ते नक्षत्रपादानुसारेण नामकरणोपयोगिप्रथमवर्णसूचके १चक्रभेदे चक्रशब्दे २८१७ पृ० दृश्यम् । शतं पादाः यस्याः पादभावः समा० ङीप् पद्भावः । शतपदी २कीटभेदे (काणकोटारि) स्त्री अमरः । ३शतमूल्यां राजनि० । [रित्नमा० ।

**शतपद्म** न०शतदलयुक्तं पद्मम् । १शतदलकमले २श्वेतपद्मे च

**शतपर्वन्** पु० शतं पर्वाणि ग्रन्थयो यस्य । १वंशे अमरः २इक्षुभेदे च "शतपर्वा भवेत् किञ्चित् कोशकारगुणान्वितः । विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः" भावप्र० । ३कटुकायां राजनि० । ४वचायां ५दूर्वायां च स्त्री ६भार्य्यायां मेदि० । ७कोजागरपूर्णिमायां शब्दरत्ना० । कप् । तत्र मेदि० टप्वे शब्दर० ।

**शतपाद्** स्त्री शतं पादा अस्याः पाद्भावः । कीटभेदे (काणकोटारि) जटा० । [जटा० । २जलौकायां च शब्दर० ।

**शतपादिका** स्त्री शतं पादा मूलान्यस्याः कप् । १काकोल्यां

**शतपुष्पा** स्त्री शतं पुष्पाणि यस्याः । ( सुलफा ) १शाकभेदे (मौरी) २क्षुपभेदे च । कप् । तत्रैव ।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित् । रुच्या-वस्तिहिता नेत्र्या बद्धविट् कृमिशुक्रहृत् । संपाकिशीतला तिक्ता दाहनुत् वातला लघुः" भावप्र० । किरातार्जुनीयग्रन्थकारके भारविकवौ पु० त्रिका० । [राजनि० ।

**शतप्रसूना** स्त्री शतं प्रसूनानि यस्याः । ( सुलफा ) शाके

**शतप्रास** पु०शतं प्रासा इव फलानि यस्य । करवीरवृक्षे अमरः

**शतभिषज्** स्त्री शतं भिषज इव ताराः यत्र । शततारात्मके अश्विन्यादिषु चतुर्विंशे नक्षत्रे । शतभिषापत्र स्त्री

**शतभीरु** स्त्री शतं बहवो वियोगिनो भीरवो यस्याः ५त० । मल्लिकायाम् अमरः तद्दर्शने हि बहुवियोगिनां कामोद्दीपनात् ततो भीरुत्वम् । [२मेचके च ।

**शतमख** पु० शतं मखा यज्ञा यस्य । १इन्द्रे हलायुधः ।

**शतमन्यु** पु० शतं मन्यवो यज्ञा यस्य शते दैत्येषु मन्युः क्रोधो वा यस्य । १इन्द्रे अमरः । २मेचके च ।

**शतमान** पु०न० शतेन मीयते मि–ल्युट् । १रूप्यपले २आढके ३तत्परिमिते च अमरः । [चिकित्सके ।

**शतमारिन्** पु० शतं मारयति मृ–णिच–णिनि । विशिष्ट-

**शतमुखी** पु० शतं मुखानि यस्याः ङीप् । १संमार्ज्जन्यां २शतमुखयुक्ते त्रि० ।

**शतमूला** स्त्री शतं मूलान्यस्याः टाप् । १दूर्वायां २स्वनामख्यातायां लतायाञ्च ङीबन्तः अमरः । [भेदे अमरः ।

**शतयष्टिक** पु० शतं यष्टयो गुच्छा यस्य । शतगुच्छके हार-

**शतरुद्रीय** न०शतं रुद्रानधिकृत्य कृतो ग्रन्थः छ । १६अ०यजुर्वेदोक्ते "नमस्ते रुद्र ! मन्यव इत्यादिके रुद्राध्याये ।